# জযদেব

{॥ জযদেব ॥}

সখী হে কেঽসি মদনমুদারম্

রমষ মযা সঃ মদন মনোরধ ভাবিতযা স বিকারম্

নিভৃত নিকুঞ্জ ধৃহংগতযা নিশি রহসি নিলীয বসন্তম্

চকিত বিলোকিত সকলদিশ রতি রভস ভরেণ হসন্তম্

প্রধম সমাগম লজ্জিতযা পটুচাটুশতৈরনুকূলম্

মৃদুমধুরস্মিত ভাষিতযা শিধিলীকৃত জঘন দুকূলম্

কিসলয শযন নিবেশিতযা চিরমুরসি মমৈব শযানম্

কৃত পরিরম্ভণ চুংবনযা হরিরভ্যকৃতাধর পানম্

কোকিল কলরব কূজিতয জিত মনসিজ তংত্র বিচারম্

শ্লধ কুসুমাকুল কুন্তলযা নঘলিখিত স্থন ঘন ভারম্

শ্রী জযদেব ভণিতমিদমতিশয মধুরিপুনিধুবন শীলম্

সুখমুৎকংঠিত গোপবধূ কঠিতং বিতনোতু সলীলম্

বিহরতি হরিরিহ সরস বসংতে

নৃত্যতি যুবতিজনেন সমং সখি বিরহিজনস্য দুরংতে

ললিত লবন্গ লতা পরিশীলন কোমল মলয সমীরে

মধুকর নিকর করংবিত কোকিল কূজিত কুঞ্জ কুটীরে

উন্মদ মদন মনোরধ পথিক বধূজন জনিত বিলাপে

অলিকুল সংকুল কুসুম সমূহ নিরাকুল বকুল কলাপে

মৃগমদ সোউরভ রভস বশংবদ নর্দল মাল তমালে

যুবজন হৃদয বিদারণ মনসিজ নখরুচি কিং শুক জালে

মদন মহীপতি কনকদংডরুচি কেসরকুসুম বিকাসে

মিলিত শিলীমুখ পাটলপটল কৃত স্মরতূণ বিলাসে

বিগলিত লজ্জিত জগদবলোকন তরুণ করুণ কৃত হাসে

বিরহিনি কৃন্তন কৃংত মুখাকৃতি কেতক দুংতু বিস্টশে

মাধবিকা পরিমল ললিতে নব মালতি জাতি সুগন্ধৌ

মুনিমনসামপি মোহনকারিণি তরুণ কারণ বন্ধম্

স্ফুরদতি মুত্ত লত পরিরম্ভণ মুকুলিত পুলকিত চূতে

বৃংদাবন বিপিনে পরিসর পরিগত যমুনা জলকৃতে

শ্রী জযদেব ভণিতমিদমুদযতি হরিচরন স্মৃতি সারম্

সরস বসন্ত সময বন বর্ণনং অনুগত মদন বিকারম্

হতাদরতযা সাগতা কুপিতেব হরি হরী হরী

মামিযং চলিতা বিলোক্য বৃতং বধূ নিজযেনা

সাপরাধতযা মযাপি ন বারিতাতি ভযেনা

কিং করিষ্যতি কিং বদিষ্যতি সাচিরং বিরহেণ

কিং ধনেন জনেন কিং মম জীবিতেন গৃহেণা

চিন্তযামি তদাননং কুটিল ভৃকোপ ভরেণা

ষোলপদ্মমিবো পরিভ্রমতাকুলং ভ্রমরেণা

তামহং হৃদি সংগতামনিশং ভৃশং রমযামি

কিং বনেনুসদামিতামিহ কিং বৃধ বিলপামি

ক্ষম্যতাং অপরং কদাপি তবেধৃশং ন করোমি

দেহি সুন্দরি দর্শনং মম মন্মধেন দুনোমি

বর্ণিতং জয়দেব কেন হরেরিদং প্রবণেন

বিন্দুবিল্ব সমুদ্র সম্ভব রোহিণি রমণেন

যাহি মাধব যাহি কেশব মাবদ কৈতব বাদম্

তামনুসর সরসীরুহ লোচন যা তব হরতি বিষাদম্

রজনি জনিত গুরু জাগর রাগ কষাযিতমলসনিমেষম্

বহতি নযনং অনুরাগমিব স্ফুট মুদিত লসাভি নিবেষম্

কজ্জন মলিন বিলোচন চুংবন বিরচিত নীলিম রূপম্

দশন বসনমরুণং তব কৃশ্ন তনোতি তনোরনুরূপম্

দশন পদং ভবদধরগতং মম জনযতি চেতসি খেদম্

কথযতি কথ মধুনাপি মষ সহ্ তববপুরেতদভেদম্

ভ্রমতি ভবানবলাকবলা যবনেষু কিমত্র বিচিত্রম্

প্রধযতি পূত নিকৈব বধূ বধ নির্দয বাল চরিত্রম্

শ্রী জযদেব ভণিতবতিরঞ্জিত খন্দিত যুবতি বিলাপম্

শৃণুত সুধা মধুরং বিবুধা বিবুধালযতোপি দুরাপম্

মাধবে মা কুরু মানিনি মানমযে

হরিরভিসরতি বহতি মধু পবনে

কিমপরমধিক সুখং সখি ভবনে

তাল ফলাদপি গুরুমপি সরসম্

কিমুবিফলীকুরুষে কুচ কলশম্

কিমিতি বিষীদসি রোদিষি বিকলা

বিহসতি যুবতি সভাতব সকলা

শ্রী জযদেব ভণিতমতি ললিতম্

সুখতুযতু রসিক জনং হরিচরিতম্

যামিহে কমিহ শরণং সখীজন বচন বঞ্চিতা

কথিত সমযেপি হরি রহহনয যৌবনম্

মম বিফল মিদমমল রূপমপি যৌবনম্

হরিচরন শরন জযদেব কবি ভারতী

বসতু হৃদি যুবতিরিব কোমল কলাবতী

॥ ইতি জযদেবকঋত অষ্টপদি ॥

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Jayadeva Ashtapadi Lyrics in Bengali PDF
% File name : ashhTapadi.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Latest update : October 1, 2010
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.

PDF file is generated [ October 13, 2015 ] at Stotram Website